# ભાગીરથીગદ્યમ્

ઓં નમો ભગવતે વાસુદેવાય |
શ્રીશુક ઉવાચ -
તત્ર ભગવતઃ સાક્ષાદ્યજ્ઞલિઙ્ગસ્ય વિષ્ણોર્વિક્રમતો
વામપાદાઙ્ગુષ્ઠનખનિર્ભિન્નોર્ધ્વાણ્ડકટાહવિવરેણા-
ન્તઃપ્રવિષ્ટા યા બાહ્યજલધારા તચ્ચરણપઙ્કજા-
વનેજનારુણકિઞ્જલ્કોપરઞ્જિતાખિલજગદઘ-
મલાપહોપસ્પર્શનામલા સાક્ષાદ્ભગવત્પદી-
ત્યનુપલક્ષિતવચોઽભિધીયમાનાતિમહતા
કાલેન યુગસહસ્રોપલક્ષણેન દિવો
મૂર્ધન્યવતતાર યત્તદ્વિષ્ણુપદમાહુઃ || ૧||

યત્ર હ વાવ વીરવ્રત ઔત્તાનપાદિઃ પરમભાગવતો-
ઽસ્મત્કુલદેવતાચરણારવિન્દોદકમિતિ યામનુસવન-
મુત્કૃષ્યમાણભગવદ્ભક્તિયોગેન દૃઢં ક્લિદ્યમાનાન્તર્હૃદય
ઔત્કણ્ઠ્યવિવશામીલિતલોચનયુગલકુડ્મલ-
વિગલિતામલબાષ્પકલયાભિવ્યજ્યમાનરોમપુલક-
કુલકોઽધુનાપિ પરમાદરેણ શિરસા બિભર્તિ || ૨||

તતઃ સમર્ષયસ્તત્પ્રભાવાભિજ્ઞા યાં નનુ તપસ
આત્યન્તિકી સિદ્ધિરેતાવતી ભગવતિ સર્વાત્મનિ
વાસુદેવેઽનુપરતભક્તિયોગલાભેનૈવોપેક્ષિતાન્યા-
ર્થાત્મગતયો મુક્તિમિવાગતાં મુમુક્ષવ ઇવ સબહુમાન-
મદ્યાપિ જટાજૂટૈરુદ્વહન્તિ || ૩||

તતોઽનેકસહસ્રકોટિવિમાનાનીકસઙ્કુલદેવયાનેના-
વતરન્તીન્દુમણ્ડલમાવાર્ય બ્રહ્મસદને નિપતતિ || ૪||

તત્ર ચતુર્ધા ભિદ્યમાના ચતુર્ભિર્નામભિશ્ચતુર્દિશ-
મભિસ્પન્દન્તી નદનદીપતિમેવાભિનિવિશતિ
સીતાલકનન્દા ચક્ષુર્ભદ્રેતિ || ૫||

સીતા તુ બ્રહ્મસદનાત્કેસરાચલાદિ ગિરિશિખરેભ્યો-
ઽધોઽધઃપ્રસ્રવન્તી ગન્ધમાદનમૂર્ધસુ પતિત્વાન્તરેણ
ભદ્રાશ્વવર્ષં પ્રાચ્યાં દિશિ ક્ષારસમુદ્રમભિપ્રવિશતિ || ૬||

# ભાગીરથીગદ્યમ્

એવં માલ્યવચ્છિખરાન્નિષ્પતન્તી તતોઽનુપરતવેગા
કેતુમાલમભિચક્ષુઃ પ્રતીચ્યાં દિશિ સરિત્પતિં
પ્રવિશતિ || ૭||

ભદ્રા ચોત્તરતો મેરુશિરસો નિપતિતા ગિરિશિખરા-
દ્ગિરિશિખરમતિહાય શૃઙ્ગવતઃ શૃઙ્ગાદવસ્યન્દમાના
ઉત્તરાંસ્તુ કુરૂનભિત ઉદીચ્યાં દિશિ જલધિ-
મભિપ્રવિશતિ || ૮||

તથૈવાલકનન્દા દક્ષિણેન બ્રહ્મસદનાદ્બહૂનિ
ગિરિકૂટાન્યતિક્રમ્ય હેમકૂટાદ્ધૈમકૂટાન્યતિ-
રભસતરરંહસા લુઠયન્તી ભારતમભિવર્ષં દક્ષિણસ્યાં
દિશિ જલધિમભિપ્રવિશતિ યસ્યાં સ્નાનાર્થં ચાગચ્છતઃ
પુંસઃ પદે પદેઽશ્વમેધરાજસૂયાદીનાં ફલં ન
દુર્લભમિતિ || ૯||

ઇતિ શ્રીમદ્ભાગવતે પઞ્ચમસ્કન્ધે સપ્તદશોઽધ્યાયાન્તર્ગતં
ભાગીરથીગદ્યં સમ્પૂર્ણમ્ |